श्री बद्रीनाथाष्टकं

श्री बद्रीनाथाष्टकं

भूवैकुंठकृतावासं देवदेवं जगत्पतिं |
चतुर्वर्गप्रदातारं श्रीबद्रीशं नमाम्यहं || 1 ||

तापत्रयहरं साक्षाच्छांतिपुष्टिबलप्रदं |
परमानंददातारं श्रीबद्रीशं नमाम्यहं || 2 ||

सद्यः पापक्षयकरं सद्यः कैवल्यदायकं |
लोकत्रयविधातारं श्रीबद्रीशं नमाम्यहं || 3 ||

भक्तवांछाकल्पतरुं करुणारसविग्रहं |
भवाब्धिपारकर्तारं श्रीबद्रीशं नमाम्यहं || 4 ||

सर्वदेवनुतं शश्वत् सर्वतीर्थास्पदं विभुं |
लीलयोपात्तवपुषं श्रीबद्रीशं नमाम्यहं || 5 ||

अनादिनिधनं कालकालं भीमयमच्युतं |
सर्वाश्चर्यमयं देवं श्रीबद्रीशं नमाम्यहं || 6 ||

गंधमादनकूटस्थं नरनारायणात्मकं |
बदरीखंडमध्यस्थं श्रीबद्रीशं नमाम्यहं || 7 ||

शत्रूदासीनमित्राणां सर्वज्ञं समदर्शिनं |
ब्रह्मानंदचिदाभासं श्रीबद्रीशं नमाम्यहं || 8 ||

श्रीबद्रीशाष्टकमिदं यः पठेत् प्रयतः शुचिः |
सर्वपापविनिर्मुक्तः स शांतिं लभते परां || 9 ||

इति श्री बद्रीनाथाष्टकं ||